**अङ्गारपर्ण** न० अङ्गारमिव पर्णमस्य। वनभेदे। अस्त्यर्थे अच्। तत्स्वामिनि चित्ररथगन्धर्व्वे पु०। भारते चैत्ररथे प०। चित्ररथगन्धर्व्वस्य अर्ज्जुनादीन् प्रति उक्तिः। "आरात्तिष्ठत मा मह्यं समीपमुपसर्पत। कस्मान्मां नाभिजानीत प्राप्तं भागीरथीजलम्। अङ्गारपर्णं गन्धर्व्वं वित्त मां स्वबलाश्रयम्। अहं मानी तथेर्षुश्च कुवेरस्य प्रियः सखा। अङ्गारपर्णमित्येवं ख्यातं चेदं वनं ममेति"। [ख्यातपात्रे।

**अङ्गारपात्री** स्त्री ६त० अङ्गारधान्याम् (आङ्टा) इति

**अङ्गारपुष्प** पु० अङ्गारमिव लोहितवर्णं पुष्पं यस्य ब०। (जियापुति) इति ख्याते इङ्गुदीवृक्षे।

**अङ्गारमञ्जरी** स्त्री अङ्गारा रक्तवर्णा मञ्जरी ब० समासान्त-कबभावाद्ध्रस्वत्वे संज्ञात्वात्। (करमचा) इति ख्याते रक्तकरञ्जवृक्षे।

**अङ्गारवल्ली** स्त्री अङ्गारा इव रक्तफलत्वात् रक्ता वल्ली कर्म्म०। रक्तवर्णफलवत्याम् (कुँच) इति प्रसिद्धायाम् गुञ्जालतायां करञ्जवृक्षे च। स्वार्थे कन्। अङ्गारवल्लिका तत्रैव।

**अङ्गारवेणु** पु० अङ्गारवर्णो वेणुः। वंशभेदे। तज्जाते ठक् अनुश-तादि० द्विपदवृद्धिः। आङ्गारवैणुकं, तज्जाते त्रि०।

**अङ्गारशकटी** स्त्री शक्नोति वोढुं शकटम्, अल्पं शकटं, शकटी, षष्ठ्यादिवत् अल्पार्थे ङीप् अङ्गारस्य शकटी६त०। (आङ्टा) (धुनाचीति) च प्रसिद्धे अङ्गाराधारे पात्रभेदे।

**अङ्गारावक्षेपण** न० अङ्गारमवक्षिप्यतेऽनेन करणे ल्युट्। अङ्गारक्षेपणसाधने पात्रे। भावे ल्युट्। अङ्गारक्षेपणे।

**अङ्गारि** स्त्री अङ्गार+मत्वर्थे ठन् पृषोदरादित्वात् कलोपः। अङ्गाराधारे (आङ्टा) इति प्रसिद्धे पात्रभेदे।

**अङ्गारिका** स्त्री अङ्गारं विद्यतेऽस्याः अङ्गार+मत्वर्थे ठन् टाप्। (आङ्टा) इति ख्याते अङ्गारपात्रे।

**अङ्गारिणी** स्त्री० अङ्गार+मत्वर्थे इनि। अङ्गारधानिकायाम् (आङ्टा इति) ख्याते पात्रे। अङ्गारवति त्रि०।

**अङ्गारित** पु० अङ्गारमिवाचरतीति अङ्गार+क्विप् ततः कर्त्तरि क्त। पलाशकलिकायाम्। अङ्गारं करोतीत्यर्थे णिचि कर्म्मणि क्त, अङ्गार+तारका० इतच् वा। दग्धप्राये काष्ठादौ त्रि०। [अङ्गारप्रकृतिभूते काष्ठादौ।

**अङ्गारीय** त्रि० अङ्गारेभ्य एतानि प्रकृतिरूपार्थे अङ्गार+छ।

**अङ्गिका** स्त्री अङ्गम् आच्छादयति अङ्ग+इनि—स्वार्थे कन् स्त्रियां टाप्। (आङराखा) इति प्रसिद्धे कञ्चुकवस्त्रे।

**अङ्गिन्** त्रि० अङ्ग+इनि। अवयवविशिष्टे, देहवति च। "येनाङ्गविकार इति" सूत्रस्य "येनाङ्गेन विकृतेनाङ्गिनो-विकार इति" वृत्तिः। अङ्गिनं नाङ्गबाधेन हन्यादपि कदाचनेति" मीमा०। प्रधाने, "एकएव भवेदङ्गी शृङ्गारो वीर एव वेति" "ये रसस्याङ्गिनो धर्म्माः शौर्य्यादय इवा-त्मन इति" च साहि०।

**अङ्गिरस्** पु० अङ्गति अगि-गतौ असि इरुट्। ब्रह्मणोमानस-पुत्रे स्वनामख्याते मुनिभेदे। भारते वन० मार्क०। "ब्रह्मणो मानसाः पुत्त्रा विदिताः षण्महर्षयः मरीचि-रत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः" इति "त्वमग्ने प्रथमोऽङ्गिरा ऋषिर्देवानामिति" श्रुतौ अग्ने-रङ्गिरस्त्वमुक्तं तत्कथा भारते वन० मार्क०। "यदा क्रुद्धो हुतवहस्तपस्तप्तुं वनं गतः॥ तदा च भग-वानग्निः स्वयमेवाङ्गिराभवत्। सन्तापयंश्च प्रभया नाशयं-स्तिमिराणि च॥ पुराङ्गिरा महाबाहो! चचार तप उत्त-मम्। आश्रमस्थो महाभागो हव्यवाहं विशेषयन्। तथा स भूत्वा तु तदा जगत् सर्व्वं व्यकाशयत्॥ तपश्चर-न्तु हुतभुक् सन्तप्तस्तस्य तेजसा। भृशं ग्लानश्च तेजस्वी न स किञ्चित् प्रजज्ञिवान्॥ अथ सञ्चिन्तयामास भगवान् हव्यवाहनः। अन्योऽग्निरिह लोकानां ब्रह्मणा संप्रकल्पितः॥ अग्नित्वं विप्रनष्टं हि तप्यमानस्य मे तपः। कथमग्निः पुनरहं भवेयमिति चिन्त्य सः। अपश्यदग्निवल्लोकांस्तापयन्तं महामुनिम्॥ सोऽपासर्प-च्छनैर्भीतस्तमुवाच तदाङ्गिराः। शीघ्रमेव भवस्वाग्निस्त्वं पुनर्लोकभावनः। विज्ञातश्चासि लोकेषु त्रिषु संस्थान-चारिषु॥ त्वमग्निः प्रथमं सृष्टो ब्रह्मणा तिमिरापहः। स्वस्थानं प्रतिपद्यस्व शीघ्रमेव तमोनुद!॥ अग्निरुवाच। नष्टकीर्त्तिरहं लोके भवान् जातो हुताशनः। भवन्त-मेव ज्ञास्यन्ति पावकं न तु मां जनाः॥ निक्षिपाम्यह-मग्नित्वं त्वमग्निः प्रथमो भव। भविष्यामि द्वितीयोऽहं प्राजापत्यक एव च॥ अङ्गिरा उवाच। कुरु पुण्यं प्रजास्वर्गं भवाग्निस्तिमिरापहः। माञ्च देव! कुरुष्वाग्ने! प्रथमं पुत्त्रमञ्जसा॥ मार्कण्डेय उवाच। तच्छ्रुत्वाङ्गिरसो वाक्यं जातवेदास्तथाकरोत्। राजन् बृहस्पतिर्नाम तस्याप्यङ्गिरसः सुतः इति"॥

तस्य च यथा अग्निपुत्त्रत्वं येन येन रूपेण च आविर्भाव-स्तथोक्तमग्निशब्दे। अग्नौ च। "शिवो भव प्राजापत्यो मानुषीभ्यामङ्गिरः इति य० अङ्गिरोभिः ऋषिभिः सम्पादितत्वात् अङ्गसौष्ठवाद्वा अङ्गिरा अग्निरूपः